।। श्रीगुरुभ्यो नमः ।।

# जघन्यमणिः

**नत्वा हयास्यं मध्वेशं भेदवादिजनप्रियम् ।**
**जघन्यमणिमातन्त्वे मायावादिगलोचितम् ।।**

वैदिकाभासस्यापि वैदिकंमन्यमानस्य वैदिकसभासु जयिनं मन्यमानस्याद्वैतिमौलिमणेः किञ्चित्पारितोषकं देयमिति सुहृद्भावेन मतानां मायिमतस्यैव जघन्यत्वं प्रतिपादयितुं जघन्यमण्याख्योऽयं प्रबन्धः प्रवृत्तः ।।

तथाहि । दर्शनानि षट् चार्वाक-जैनबौद्ध-साङ्ख्य-नैयायिकवैशेषिक-मीमांसक-वेदान्तिभेदेन । तत्र प्रत्यक्षमेकं प्रमाणं मन्वानाश्चार्वाका अतीन्द्रियमात्रं जगदपलपन्तः धर्माधर्मपुण्यपापं स्वर्गनरकादीन्नाङ्गीकुर्वन्ति । मायावादी तु प्रत्यक्षमप्यतत्त्वावेदकं वदन् ऐन्द्रियकं जगदप्यपलपन् चार्वाकादपि जघन्योऽत एवाभियुक्तैर्महानास्तिक इति कीर्तितः ।।

जैनबौद्धौ वेदोऽप्रमाणमिति मन्वाना वैदिककर्माणि त्यक्त्वा केशोल्लुञ्चनादि स्वमनीषाकल्पितधर्मानाचरन्ति । मायावादी तु वैदिकंमन्यमानोऽपि मन्त्रब्राह्मणात्मकं वेदमतत्त्वावेदकं वदन् तस्याप्रामाण्यमेवाभिप्रेति । याथार्थ्यं खलु प्रामाण्यम् । यथावस्थितज्ञेयविषयीकारित्वमित्यर्थः । इदमेव हि तत्त्वावेदकत्वम् । उपनिषदात्मकं वेदं तत्त्वावेदकं मन्वानोऽपि तत्त्वस्य ब्रह्मणः सर्वथाऽवाच्यत्वं वदन् सर्वथाऽवाच्यस्य स्वलक्ष्यत्वस्याप्यसम्भवेन ब्रह्माप्रतिपादकत्वमेवाभिप्रैति । वेदोक्तस्येश्वरसार्वज्ञादेरपि मिथ्यात्वं वदतीति को विशेषस्तस्य बौद्धात् । स्वस्य वैदिकत्वख्यापनं जनप्रतारणमात्रमिति प्रतारणं विना साक्षादवैदिकत्वमङ्गीकुर्वतो बौद्धादपि जघन्यत्वम् ।।

साङ्ख्यास्तु प्रकृतिनिष्ठं कर्तृत्वं भोक्तृत्वं च पुरुषे आरोपितमिति वदन्ति। मायावाद्यपि अन्योन्यधर्माणामन्यस्मिन्नारोपितत्वं वदन् आत्मनि कर्तृत्वं भोक्तृत्वं चारोपितमित्यङ्गीकरोति । अधिकं तु कर्तृत्वभोक्तृत्वस्वरूपस्यापि मिथ्यात्वमङ्गीकृतमिति मायावादिनः साङ्ख्यादपि जघन्यत्वं सिद्धम् ।।

साङ्ख्यास्तु निरीश्वरा अहं तु सेश्वर इति मा वादीः । यतो तवेश्वरस्यैश्वर्यमपि मिथ्या । ईश्वरस्य पर्जन्यवदनुग्राहकत्वं वदन्तः सेश्वराः साङ्ख्याः तदनुग्राहकत्वं सत्यं मन्यन्त इति जन्मादिकर्तृत्वमप्युपलक्षणं परोपहितत्वेन मिथ्येत्यारुवतो मायावादिनः सकाशादुत्तमा वेदितव्याः ।।

नैयायिकवैशेषिकभेदभिन्नास्तार्किका आत्मनि अष्टौ गुणान् ईश्वरे पञ्च-गुणानङ्गीकुर्वन्ति । मायावादीतु नैकमपि गुणमङ्गीकरोतीति तेभ्यो जघन्यत्वं स्पष्टम् । ईश्वरेऽङ्गीकृतमपि सार्वज्ञ्यादिकं मिथ्येति मन्वानो न कथञ्चिद्विशिष्यते निरीश्वरवादिनः ।।

मीमांसका यद्यपि वैदिकब्रह्मस्थाने कर्मपट्टाभिषिक्तं कुर्वन्ति । सर्वस्यापि कर्माधीनत्ववचनेन । तथाऽपि कर्म वा सत्यमित्यङ्गीकुर्वन्ति । मायावादी तु कर्मापि मिथ्येति वदन् ब्रह्म सत्यमिति वदन्नपि निर्गुणत्वाङ्गीकारेण शून्यमतचरणानुसारीति मीमांसकादपि जघन्यः ।।

किञ्च मीमांसकमते स्वर्गाभिन्नो मोक्षो यद्यपि नाङ्गीकृतः । तथापि ‘यन्न दुःखेन सम्भिन्नम्’ इत्यादिना दुःखरहितसुखप्राप्तिरूपमोक्षमङ्गीकृतम्। अयं तु मोक्षे सर्वाभिलषितसुखमात्रमेव न सहत इत्यतोऽपि मीमांसकाद् जघन्यः ।।

वैदिकंमन्यमानोऽपि मायावादी ‘कुहकेन्द्रजालैः वैदिकेषु स्थातुमुत्सहन्ते’ इत्यादिना मैत्रायणीशाखायां ‘असत्यमप्रतिष्ठतं ते जगदाहुरनीश्वरम्’ इत्यादिना



गीतायां च निन्दितत्वेन वैदिकाभास एव ।।

वेदान्तित्वाभिमानस्य विद्यमानत्वेन वैदिकेषु परिगणनेऽपि वेदविरुद्धभाषित्वाद्वैदिकेषु जघन्य एवेति द्रष्टव्यः।

अधोगतिर्नित्यदुःखं चेति वसनद्वयमलङ्कारमूलभूतमस्मद्गुरुवरेण्येन मुख्यप्राणावतारभूतभगवत्पादाचार्येणैव दास्यत इति ‘जघन्यमणि’समर्पणेनैव कृतार्था वयमिति सन्तोष्टव्यम् ।।

**विश्वेशतीर्थकरजविश्वनन्दनभिक्षुणा ।**

**जघन्यमणिरित्यद्धा मायावादिगलेऽर्पितः ।। १ ।।**

**अनया सेवया प्रीयाद्गुरुहृत्पद्ममन्दिरे ।**

**मध्वमञ्चे शयानः श्रीधराश्लिष्टो हयाननः ।। २ ।।**

**।। इति श्रीमद्देवेन्द्रतीर्थपूज्यपादान्तेवासिना**
**श्रीमद्विश्वेशतीर्थश्रीपादकरकलमसञ्जातेन**
**विश्वनन्दभिक्षुणा विरचितो जघन्यमणिः समाप्तः ।।**

**।। श्रीकृष्णार्पणमस्तु ।।**

**।। अयं प्रबन्धोऽद्वैततमःखण्डनचण्डभानूनामस्मत्परमगुरुस्थानापन्नानां**
**श्रीविद्यामान्यतीर्थश्रीमच्चरणानां नवमाराधमहोत्सवे**
**तदन्तर्यामि मध्ववल्लभगोपालकृष्णाय समर्पितः ।।**